क्षामेवं यदि न तस्तयोः प्रकृतत्वा वाक्यत्वनिराकांक्षमिहेतनयोः। कामवाक्यं तावद्धिपरिलब्धहोमाश्र

यं नाश्रय संबंधस्य प्रमाणमपेक्षते। दधिस्वरूपमपि लोकसिद्धं नाकांक्षत्यतः प्रादि वदलोकिकं। अतो नन

दर्थमन्यापेक्षा। दध्नोपि फलवद्धोमसंयुक्तस्य न फलांतरापेक्षा। तस्मात्पृथक्संयोगाद् नपार्थदधिस्यात्॥

× ननु पशुकामउक्थ्यं गृह्णीयात् यः कामयेत बहुस्पांसु नायं त्रिसत्वरेन यजेत तेति फला इति ३

२ यविहिता वक्ष्यपक्षरुद्रश्च गुणसंस्कारगुणसमर्पणायेव वचनानर्थमिह दधिस्वरूपसमर्पणार्थं अपेक्षते स्यतआरुदधीति

वदुग्धीहि:

© Dharmartha Trust J&K. Digitized by eGangotri

मी०॥ १४

ननु कर्त्रर्थे सेपयोव्रतानीवेनराजकर्तृकात्फलेन स्यात् इत्युक्तं तदधिकृतेति ग्रंथं नोज्यं १

षष्ठे तस्य न प्रकरणग्रहणमित्यत्रान्वयः २ ता ६ जंजप्यमानमंत्रेफलं कल्प्यं इह तु पुंस्त्रीसाध्यं कर्म पाल्मित्यर्थः २

द्रव्याणां तु क्रियार्थानां संस्कारः क्रतुधर्मस्यात् ॥ ज्योतिष्टोमे पयोव्रतं ब्राह्मणस्य दधि राजन्यस्येति श्रूयते । तत्पुरुषार्थं कर्त्रर्थमि-

ति संशये पुरुषसंयोगाद्व्रतस्य पुरुषप्रीत्यर्थता । तत्फलस्य जंजप्यमानमंत्रन्यायेनास्य भवतीत्ययोनिय-

मस्यापि [illegible] संस्कृतस्य तत्फलनिराकांक्षत्वान्न प्रकरणग्रहणमिति पुरुषार्थत्वं । उच्यते नियमं त्वंतरेणापि

पुरुषप्रीतिदर्शनात् । नियमस्य फलं कल्प्यं तत्र प्रकरणात् क्रतोः । कल्पनीये हि फले प्रकृतक्रतूपकारसिद्धिरेव

तदधिकृतसंस्कारद्वारेण पयोव्रतनियमस्य फलं युक्तं आश्रयितुमिति कल्प्यते ॥ चोदनायां फलाश्रुतेः कर्म-

मात्रं विधीयेत न ह्याशब्दं प्रतीयते ॥ विश्वजितादिषु जीतेत्यादिषु अश्रुतफलासु चोदनासु फलमस्तीति नेति संशयः ।

पः । नास्त्येव फलमेतस्यां चोदनायां फलाश्रुतेः । अथ वाप्यमदृष्टं हि फलेन न विना कृत्या ॥ अस्तु वा मतेन तत्र

दध्याहारेण [illegible] ते । परिपूर्णमिदं वाक्यं नाध्याहारमपेक्षते । ननु यागेन कुर्यादित्युक्ते किं कुर्यादिति सापे-

क्षत्वादध्याहारोऽवकल्प्यते । सत्यं यदि यागेन कुर्यादित्युच्यते यागं कुर्यादिति तु उक्ते परिपूर्णत्वान्ना-

ध्याहारापेक्षा फलश्रवणे हि विध्यानुगुण्यात्समानपदोपात्त धात्वर्थमितिक्रमेण वाक्यसमर्पितं

फलं नाध्याहृतेन भावनावलंबते । तदभावे तु धात्वर्थं नाध्याहृतं को निवारयेत् । तथा च सति संपूर्णे

वाक्ये नाध्याहृतिक्षमं । ननु एवं यागकर्तव्यतायां नच्यमानायां न कृतिसाध्यत्वं स्यात् । को दोषः विध्या-

नर्थक्यं । तदपि सर्वतु निःफलस्य कर्तव्यवचनं न प्रमाणं स्यादिति । तदप्यसत् । लोमायं यथा गच्छेदुन

नन्वेवं विधेः साधितं प्रामाण्यं प्रसक्तं ध्रियेते [illegible] यागात्फलं कल्प्यतामिति शंकते निःफलस्यापि

प्रत्यक्षस्यार्थ्यैरवांसंप्रयासइतिपरिहरति तदप्यसत्त्विति

© Dharmartha Trust J&K. Digitized by eGangotri

अप्रवर्त्तमानस्येत्यर्थः ७ अर्थापत्तिपर्यायोपादानिकप्रमाणेन ८ तदानीं १

चस्त्वर्थः यानि साधनान्यवाक्यवन्तः किं कुर्मः। न चैवं कर्त्तव्यतावलादेव फलमुपकल्पयितुं शक्यं। नैवं दालेदुःखदर्शनात्कृ कुतोनश
सत्स्वविरोधादयपरसां च फलं नहृतमात्रविनष्टेन यागेन शक्यते कर्त्तुं। न चापूर्वद्वारेण संततवर्त्तिनं दृष्टा क्यमित्या
नात्। कुतो नेहि फलेच्छं गम्याहि कुसा धात्वर्थस्य तत्साधनत्वे शब्देन प्रतिपादिते तद्व्यापारे दृष्टमप्यपूर्वं कल्प्य काङ्क्षाया
तोयागक्रियामात्रपर्यवसिते नु शब्दे कथमपूर्वसिद्धिः। तदभावे च कथं कालान्तरभावि फलं कल्पनं। नदिन माह१
रन्तरात्र्यं भवति फलाधानं अपूर्वं तदधीनं च फलमिति। असत्यपि भाव्यापेक्षणे कृत्स्य यागः कर्त्त
व्य इति नियोज्यापेक्षणा फलकामस्याध्याहारादिति चेन्न। अध्याहारमन्तरेणापि तल्लाभात्। यथा
निषधाधिकारेषु अप्रवृत्तस्य निवर्त्तनासंभवात् न अर्थावच्छेदकतया पयःकाकापि प्रवृत्तिरेव विष
या इति तद्विशिष्टस्य नियोज्यतावगमात्। तथा ये क्रित्वा एवमाश्रित्य फलकामोध्याहृयते तथा
परस्मैपदेनोपि जनशत्रुस्याजीवनस्य तत्संभवात् शक्रो जीवं यावाधिकारी लब्ध इति किमध्याहारेण।
तस्मान्निष्फलमेवेदं कर्मनिश्रायते च यते विधियकेन क्रियानेव धात्वर्थभाव्यमृच्छति। नाचेन च
विनावाक्यं नैव तत्परिपूर्यते। वाक्यशेषपरत्वात् फलमध्याहरिष्यते। असत्यपि फलश्रव
णे ज्योध्याहृतेकरणांशे फलमेवमयाजकेन विधिः इति कर्तव्यतांशमात्रेतु सप्रयोजक इति प्रयुक्तिः का घ

© Dharmartha Trust J&K. Digitized by eGangotri

णेवेतनप्रवर्तनात्मकविध्यर्थस्य भावनाधारत्वं यतावन्न कथं विज्ञाय्यमंगीकरोतीति तदतिरिक्तभाव्यापेक्षा
णात्तदाकांक्षापरिपूर्णवाक्यं फलपदाध्याहारमपेक्षतेतत्रलौकिकमपि वेदवाक्यैकदेशत्वात्तथा आहृतं
वैदिकमेव भवति किमुत पदा वैदिकमेवान्यत्र स्थितमध्याहृियते। कथं पुनर्व्यवेतस्यानुषंगाः यदप
गमः। नायमनुषंगः किंत्वध्याहारः सचयत्र क्वचिदपि व्यवस्थितस्याविरुद्धः। तेनाश्रुतफलानाम
प्यध्याहृतफलान्वयात्॥ सर्वेषांकर्मणामत्रफलवत्त्वमवस्थितं॥ नतत्सर्वार्थमनादेशात्॥ स्थितप
लार्थत्वे किं सर्वफलार्थमुतैकार्थमिति विशेषानिर्देशात्सर्वार्थत्वेप्राप्तेऽभिधीयते येनैव के
नतदाकांक्षापरिपूरितं तेनैव तन्निराकांक्षमिति नानेककल्पना॥ सस्वर्गः स्यात्सर्वान्
प्रत्यविशिष्टत्वात्॥ एकंफलमित्युक्तं किं तदेकमिति न ज्ञायते अतः पुनरपि सर्वार्थत्वमप्राप्तौ एवं
वा नघ्यव स्थायां प्राप्नोति। तदुच्यते। स्वर्गोनतिर्नायाप्रीतिरूपोदुःखविवर्जितः। स्वर्गयातेजि
तपत्येनमत्स्यपत्त्स्यसुखंनराः। सति संभवेन्यात्स्वस्यतत्पर्यविषयत्वं न्याय्यं अविशेषप्रवृ
त्तस्यानि संकोच परिहारात्। स्वर्गश्च दुःखासंपृक्तनिरतिशयसुखात्मकः सर्वेषामभिमतः पश्वा
दिसुखं दुःखानुषक्तमल्पं च केचिदेवप्रार्थयंते प्रसवायपरिहारस्तु सर्वाभिलषितापिप्रस

© Dharmartha Trust J&K. Digitized by eGangotri

वायापेक्षया क्रियतापि विलंबेन हस्वमागच्छतीति तस्य सुकरत्वं सुखमेव वरं फलं । तच्चानतिरूपस
न स्वर्गात्मकमिति स्थितं ॥ कृतोपकल्पार्थवादस्य गवत्कालाजिनिः । प्रतितिष्ठंति ह वा य एता रात्रीरु
पयंतीति श्रुतौ रात्रिशब्देन ज्योतिष्टोमादिस्यादिवाक्योपात्तदिनानि सौ याहानि कर्माण्युच्यते । तदिदं
रात्रिसत्रं स्वर्गार्थमुत प्रतिष्ठार्थमिति संशयः । तदर्थं च प्रतितिष्ठंतीति किमयं फले विधिरुतार्थ
वाद इति । अपापश्लोकवत्तवर्तमानापदेशात्फलविधित्वसमर्थत्वात्तदर्थवाद इति ॥ अ
नादिष्टफलत्वेन तस्मात्स्वर्गफलार्थता ॥ निर्देशात्तु प्रतिष्ठैव फलत्वेन विधीयते । क्रतुवचनेन
कर्मैतन्निराकांक्षं फलं प्रति । कल्पनीयं फलं तत्र विनाशो घ्याहृते वरं स्वर्गस्याध्याहारे त्वचह
पत्तस्य च कर्तृनकर्मसंबंधः फलत्वं च कल्प्यते । प्रतिष्ठाया स्तस्य स्वरूपसमेवकावा ... फल
त्वसिध्यर्थं संनयनादिविपरिणाममात्रं लघीयः । उपयंती स्यपि वर्तमानापदेशो विधिरूपेणावि
परिणाम्यते । पदस्वरूपव्यवहितान्वयः तद् यमर्थः । ये प्रतितिष्ठासंतीति ए ता रात्रीरुपेयुरिति
एवं च धर्ममात्रकल्पनाल्लाघवं । नरघातु सर्वस्यैवार्थवादत्वात्सकलस्यैव विध्युद्देश्यो अथ
निष्पन्नफलविशिष्टः कल्पनीयः । स्वर्गकामा एता रात्रीरुपेयुरिति । कल्पितापि सोप्रतिष्ठ

न७

विपरिणामः

विपरिणाम्य ते

क्रासं ५

© Dharmartha Trust J&K. Digitized by eGangotri

तद्यपियत्प्रयोगादिधिनेस्मात् भव आह २ विध्यभावे कथं रात्रीणां प्रतिष्ठासाधनता आह ४

मा०॥
१६

नग१

16

र्थ्नादेनेनसुखंसंगच्छते।यस्मात्प्रतिनिष्ठन्तितस्मात्स्वर्गकामानुयेयुरितिकिंकेनलंगच्छतेतत्तस्ययघप्पध्या
हारःस्यात्तत्रघाप्यर्थवादसंगसंर्यप्रतिष्ठेवाध्याहर्त्तव्येतिप्रतिष्ठार्थता॥काम्येकर्मणिनित्यःस्वर्गोपिया
पश्चांगेवकल्प्येर्थः॥यत्रस्वर्गादिन्यसफलत्वश्रुतंसोर्थवादनिवपिब्रह्मवर्चसकामइतितत्किंस्वर्गार्थेष्वफल्ला
र्थेचतत्तत्श्रुतफलार्थमेवेतिसंशयः।तत्रोविधिःसामान्यसंबंधेनसर्वफलार्थंप्रवर्त्तकः।स्वर्गस्यास्यापि
तःसर्वैरिष्यमाणत्वात्सर्वार्थत्वनिश्चयः।कतिपयाभिलषितब्रह्मवर्चसाद्यर्थत्वेविधेरविनियोषतःसर्वपुरु
षान्प्रतिप्रवर्त्तकत्वमवगतंबाध्येत।सर्वाभिलषितस्वर्गार्थत्वेतुनदनुग्रहःस्यादितिस्वर्गार्थ
ता।ब्रह्मवर्चसादिश्रवणंत्वन्वाचयत्वेनव्याख्येयं।काष्ठाहरणादेवग्रामाहरणं।सोर्थोयथास्वर्गकु
र्यात्ब्रह्मवर्चसंचसमर्पितंभवतीति।एवंचविधिनैवस्वर्गार्थत्वेनपरार्थत्वाज्ञात्रिसत्रेफलश्रु
त्यामर्थवादः।पर्णमयीन्यायादितिपूर्वाधिकरणमप्यादिशम॥अत्रोच्यते।अविरोधप्रती
तिर्यापित्स्मार्त्तेणाज्ञापतेपदार्थेनैरश्रूवाकाल्पनिकेन्द्रियेच्छापतेहिंसा।ब्रह्मवर्चसकादिविषयोयम
तोविधिःस्यात्स्वेदन्वाचयपक्षस्यात्मवदन्यान्यसंश्रयः।स्वर्गार्थत्वेहिनिश्चितेस्यादन्वाचयःतनि
श्चयेचसतिफलान्तरापेक्षायां[illegible]कल्पना।तस्माद्ब्रह्मवर्चसाद्येवफलं।सार्वकाम्यमंगकामैः

स्वर्गा

© Dharmartha Trust J&K. Digitized by eGangotri

मा३

एकस्रोवा अन्याद्दष्टयः। अनुवादापेक्षितां प्राप्तिं वक्तुं गोदोहनादीनां
विधिविषयीकृता भावनासाध्यसाधनयोः संबंधघटिका २ उपकारकसंबंधिन उपकार्यसंबंधो कोऽदृष्टांतः २

प्रकरणात्॥ सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति किमयमनुवादो विधिरिति संशये विधिर्भावनोपास्य
वर्णात्प्रभावेन साध्यसाधनसंबंधाया योगात् वाजपेययूपे यदि विगोदोहनादिगुणकामैः पश्वादिभिर्दर्श
पूर्णमासयोः संबंधसद्भावात् तदपेक्षोऽयमनुवादो दर्शपूर्णमासस्वरूपे इति प्राप्ते ब्रूमः॥ षष्ठी
संबंधमात्रेऽपि वर्तमानानां दृष्ट्यर्थतादर्थ्य वक्तुं चतुर्थी तत्प्राप्तिमनकेनचित्। स्यात् प्रधानफलार्थत्व
मंगानांतस्तु महात्। न त्वेवं फलत्वं प्रधानस्य कुपंवन। सर्वकामार्थता तस्मादप्राप्तेहविधी
यते। कर्तव्यावितिचोहार्यविधिर्भावनयोः पदं नत्वपि चोदनाभ्यावाप्रसिद्धे विधिर्भावने। आश्रि
सफलसंबंधमात्रमत्रोपदिश्यते यत्तु दर्शपूर्णमासो वृत्तेर्वोत सर्वभोक्तार्थेनेति तस्मात्फलविधि
धिः॥ नत्वसर्वेविधानात्॥ किमेकस्मिन्नेव प्रयोगे सर्वकामाः भवंति नन्वप्रयोगभेदेनेति संश
ये सर्वं युगपदेव स्यात्रिमित्तस्याविशेषतः॥ याश्रीं ज्ञेमित्तमेकस्य ताद्दगेवापरस्य हि॥ कामना
वशाद्भिन्नेशेषो यदेवयदा काम्यते तदेवतदा नान्यदिति चेत्। न। अनंगत्वात्। न हि कामनाकर्म
णः फलस्य वा गंये न तदभावे फलानुत्पत्तिः स्यात्। ननु उपादेयत्वेन तस्यकर्तुर्विशेषणभूतकाम
मनाकर्मांगमेव। न कामिनमुपादानं दृष्टिश्यपहि कामिनं कर्मोपदिश्यतेऽनि षष्ठे वक्ष्यते। अत

विशिष्टविधिप्रसक्तेन विधिनांगमेवांतरमेवविरोधमभ्यूयते कामनायाः। न चैवं विशिष्टः कर्त्ता न विधी

श्री० ७ नचविशेषायहणमिसाशंक्याह कामनेति एतदुपपादयति विधिहीति कामनायाअनंगत्वेपिकाम्यमानमे
वफलंजायतेनतरक्षमीहितसाधनत्वस्यविध्यवगतत्वादनमीहितोत्पादकत्वायोगा दित्यर्थः
१७ अंगीकृत्यांगतामाह ८
एवलिंगस्याविवक्षायांपिकर्मण्यनुपादेयस्यापिकामिनोपूर्वंप्रतिगुणत्वेनतत्कामनापिनियोगवि दत्ते२
शावंगमितिचोद्धनितस्यापिलिंगविवक्षाद्युतरिवाअत्रायमपरोविशेषः पशुफलकामानप्रयुक्तेतोफल
न्यवच्छेदर्थ्यतेननिर्दिष्टस्यतादर्थ्यंनकर्मविधीयते कामोपवेधस्वफलत्वजस्वनार्थः नस्वयंपनंत्राज
पिचपयुगपत्कामयेनतेषामनिवार्येवयुगपदुत्पत्तिःस्यात् तस्मात्क्रमपरत्युः एवंप्रामैवक्रमः
कामोदितोनकर्मैवसाधनत्वेनबाधते तथाबाधितत्वमानानोसाहित्यनाविवक्षितं पशुकेकसे
वकामस्येतिनिरपेक्षत्वमसाधनकर्मदंबोधतेतच्चसापेक्षत्वविरूप्येन याद्यांकारणापादत्त्य
कार्यस्यनिष्पादकंतदेकमेवयुगपज्जनयतियथामृत्पिंडो युगपदेकमेवघटंजनयतिनानेकं कास
नावशाच्चविशेषः विधिर्हिचैवनप्रवर्तनात्मकंसमीहितस्यैवफलत्वमुपवर्णयतिनपस्याहित्व
स्तपस्यापिषयुगपत्कामनानेचापिकर्मणोयुगपत्सामर्थ्यलाघवदृष्ट्याप्रत्ययस्यप्रयुज्यवेनदृष्टान दिनानि
देवमतिनामनुपपाद्येकफलानि कर्माणिफलस्यस्वर्गस्यपश्वादेर्वासाधनत्वेनवा १७
युगपदेकमेवनथाविधंफलंजनयतिनानेकं इतरथासकृदेवयावद्दिष्टंफलंसिद्धमितिनफ
अपिचेतियदुक्तंतत्पतिस्मृति ८

© Dharmartha Trust J&K. Digitized by eGangotri

कस्यचित् आमुष्मिकत्वस्याद्धिकामनाभावात् ५ प्र.पृ. काश्यां क्षेत्रसंन्यासादिना जन्मान्तराभावात् चित्रादि
इहाजन्मन्यसंभवाद्यु १ नानुष्ठेयं स्विक्तं नेच्छजन्मनि फलार्थं नेनाप्यनुष्ठेयमिति

न्यमेकं कर्म पुनः प्रयुज्येत । इष्ट्येन च पुनः प्रयोगः नेष्टं स्याप्येकमेव युगपत्फलं न च साहित्ये नैक
त्र कामनां फलं त्वं नैकं कस्यति वाच्यं । साहित्यस्यास... विवक्षितत्वादित्युक्तेः । अतः पर्याये कस्मिंश्चित् योगकाश्चि
ण कामानां । योगसिद्धिर्वा वीर्यस्यासत्ययोगित्वात् ॥ इदानीमैहिकामुष्मिकत्वं फलानां विसत दित्यर्थः २
स्वर्गः सर्वदामुष्मिक एव । वृष्टिरन्निवारावेस्यानेर फलं च पुत्रगतब्रह्मवर्चसादिकमैहिकमेव
कामनावशादानुपश्वादयास्तु संयतिकमामुष्मिका एव ते नानियता इति । तत्र प्रति...तादिकं द ग्र ५
ष्टपश्वादेः कारणान्तरैर्देहान्तरे न कृतेवातः चित्रादेः फलहेतुता । पश्वादिरूपस्य प्रतिग्र श्ल ६
हादेरूपायदर्शनादद्दृष्टानपेक्षत्वाद्देहस्यानुमातापितृसंयोगमात्रेणानुसन्नेः कारणान्त
रापेक्षणाद्धि...ष्टफलोपभोगार्हशरीरान्तरकल्पमेव चित्रादेः पश्वादिहेतुत्वमित्यामुष्मि
कान्येव पश्वादीनीति प्राप्तेऽभिधीयते । साध्यत्वमेव पश्वादेश्चाद्येन प्रतिपाद्यते । अमुत्रैके
वेत्येवं नास्ति त्वाद्यानियामकः । देहान्तरमुखत्वं च फलानामप्रमाणकं । विपाकः कर्मणा
येषां प्राग्देहविनिपाततः । प्राप्तस्तानीह भुज्यन्ते तेनान्यानि भवान्तरे । दैवं पुरुषकारश्च प

© Dharmartha Trust J&K. Digitized by eGangotri

तः तेन प्रतिबन्धाद्धिलंबेन फलमिति प्रतिबन्धकसदसद्भावानियमात्फलनियमः इति ...कः २

१८

बृहस्पतिसवेकालविधौवाजपेयकर्तृत्वादिदविधानात्प्रकरणबाधः ९ यौ २

कौ १ इ ९१ विधिः

समवाये वासना

स्यादेः कारणाद्वयं ॥ तदुंसाध्यकारेण । तेनैव वहिःकारणं ज्ञायते । तस्मादनियमः ॥ समवाये वासना

स्यादेः कारणाद्वयं । तदुंसाध्यकारेण । तेनैव वहिःकारणाँ ज्ञास्यति । तस्मादनियमः ॥ समवाये वास्न

संयोगस्यार्थवत्त्वात् ॥ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति क्रमिंगप्र ज [illegible] न सवधो

वाजपेयांगत्वेन बृहस्पतिसवस्य । न तत्कालार्थः संयोगो वाजपेयोत्तरकालत्वं बृहस्पतिसव

स्याप दित्र्य तत् इतिसंज्ञायत्र प्रयावाजपेयस्य बृहस्पतिसवस्य च । प्रज्ञातफलत्वान्नैव नित्ययोगागि

त्वसंभवः । न च कर्मांतरे यु तेन लक्षणाहितथाभवेत् । को प्रसङ्ग येन कालत्व कल्प्यते । कोऽन लक्ष

णाप्रसिद्धस्य तावद्बृहस्पतिसवस्य पुरोधाकामादिफलार्थत्वान्न वाजपेययागत्वात् तद्धर्मकक्रमांतरविधौ

बृहस्पतिसवशब्दाद्धर्मलक्षणार्थः स्यात् ॥ कालविधौ तु तस्य कालार्थत्वान्न काचिल्लक्षणा तस्मात् प्र

सिद्धबृहस्पतिसवस्य वाजपेयपूर्वकर्तव्यविधीयत इति प्राप्ते विधीयते । वाजपेयस्य तु रवं स्यादेयतं

परार्थता । न प्रक्रिया च बाध्यते तेन च क्रमं तत्प्रति । कालः शक्यमनुपादातुं कालं कर्म हि बाध्यते । काले

वर्तमाने तत्क्रमी विपरिवर्तनात् प्रसिद्धात्कर्मणो भिन्नमनिर्ज्ञातप्रयोजनं । वाजपेययागत्वावन

वाक्येन तु विधीयते । वाजपेयप्रयोगं यथा कं निर्वर्त्यन नाप स्यवक्षतीस्यात् । इदमपरमंगनस्यापश्चा

त्कर्तव्यमिति एवं च वाजपेयस्य विधानात् तद्धद्धानुग्रहो न्यथा लस्यासंतपरार्थता स्यात् । का

र्थसंयोगपक्षे कालो पलक्षणार्थत्वादसंतपरार्थः स्यात् । अंगांगसंबंधे तु अंगासमर्पकत्वेन पारार्थ्यपिनासंतप १८
सार्थः उद्देश्यसमर्पकत्वात् ५

© Dharmartha Trust J&K. Digitized by eGangotri

कालार्थसंयोगप्रकरणविनियोगः सति च तस्मिन्कालार्थेतीतरेतराश्रयान्न कालार्थसंयोगार्थतेति भावः ५
तर्हि संस्थोक्तेः कोर्थस्तत्राह अतएवेति वैमृधा इति रिक्तोगं कुर्यात् पौर्णमासी समाप्तिपरं तद्धि स्वर्थः ७

त्तापलक्षणार्थत्वात् वाजपेयप्रकरणं न बाध्येत संस्थितेन च कर्मान्तरत्वे च मेलक्षणापि मासाग्निहोत्रवद्दोषः। उपपादितमिति
चेत्॥ संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपतीति किं पौर्णमास्या वैमृधस्य चांगाङ्गिभावप्रयोजन संबंधः पौर्णमास्य
गं वैमृधः उत कालार्थः संयोगः तस्मिन्कालेत्रिसमायाः प्रकरणादुभयोरपि पौर्णमास्यां अंगमिति संस्थाप्य
संस्थासंयोगात् संस्थितस्य पुनरंगासंभवात् नांगप्रयोजनसंबंधः। कालार्थस्तु संयोगः प्रकरणाद्धि
षादुभयांगमिति प्राप्ते उच्यते॥ पौर्णमास्याहि संयुक्तो वाक्येनानेन वैमृधः॥ तस्य प्रकरणेनेष्ट न ह्यसं
वरः। यत्तु संस्थितायानांगसंभवतीति तदुभयांगत्वेपि तुल्यान चामावास्यांगमेवेदमिति युक्तं प्रकरणाद्वि
षादितिलयेवाक्षे। अतो यद्यपि पौर्णमासीं तंत्रं द्वयोः साधारणं विहितं तथापि पौर्णमासीं समाप्य पुनरि
दमंगं कर्तव्यमिति वाक्यार्थः। तथा च वाक्यशेषः। वैमृधः पौर्णमासेनु निर्वाप्य भवतीति तेन पूर्णमासः सं
वतीति एवं ज्ञापयन पौर्णमास्यावेगुण्यमिवाशंक्य तत्समाधानार्थतां दर्शयन् पौर्णमास्यंगत्वं दर्शयति॥ अ
नुसन्नेत्वनुकालः स्यात्प्रयोजनसंबंधाभावात्॥ आग्निमारुतादूर्ध्वमनुयाजैश्चरंतीत्यत्रापि कालार्थ एव संयो
गस्याप्येतद्यपरस्यात् संगप्रयोजनसंबंधमन्यानत्वात्तरं। आग्निमारुतस्य सामार्थत्वेनोपदिष्टत्वात् अनुयाजा
नां च यस्य स्यात् प्रयाति दिष्टानां विपरिवर्तमानत्वान्न कर्मांग त्वं तेषां तु निर्ज्ञात प्रयोजनानां जंगमि स्याप
भावात्कालार्थः संयोगः॥ उत्पत्तिकालविषये कालः स्याद्वाक्यस्य प्रधानत्वात्॥ ज्योतिष्टोमे श्रूयते॥ दर्शपूर्ण
आग्निमारुतमनुयाजागमिसवश ... चाद्वाक्यो पातत दंगत्वस नवे आग्निमा
गा १ ... त्वतार्थत्वानावेनांगत्वात् आग्निमारुतं शंसतीत्यस्मिन्वाक्य एव केमध्यी कांक्षणात्तत्र चाग्य संयोगा

(left margin) प्र. प्र. आमावास्याविधिशेषः ... सिद्धांतमेते ... विधेयं ... सिद्धं
(right margin) हि ... युक्तं ५ ...

© Dharmartha Trust J&K. Digitized by eGangotri

मासाभ्यामिष्ट्वा सोमेन यजेतेति। तत्र दर्शपूर्णमासशब्दाभ्यां संतपारार्थ्यपरिहारायांगप्रयोजनसंबंधपरत्वाभ्युपगमः।
नेवं दर्शोपलक्षिते काले सोमयागो विधीयते। स च प्रकृतदर्शादिकर्मान्तरसंभवः। दर्शोत्तरकालमनुपादेयं प्र
त्युपादीयमानोपि सोमः सन्निधौ विधिसामर्थ्यादिति न्यायात् कर्मान्तरं। प्रकृतस्यासोपकारार्थत्वान्न दर्शांगतां प्र
तिपद्यते। अतो न तावत्सोमस्य दर्शांगत्वं अविधीयमानत्वात्। न ह्यविधीयमानमंगं भवति। न चात्र दर्शपू
र्णमासौ विधीयेते विधायकाभावात्। दर्शोत्तरकाले हि सोमस्य विधिः न दर्शस्य। न चाकृतयोर्दर्शपूर्ण
मासयोरुत्तरकाले सोमः शक्यते कर्तुमिति निजधर्मयोरपि विधिः स्यात्। विध्यंतरविहितयोस्तयोर्लक्षि
त्वानुपपत्तिः। तदुत्तरकालत्वं सोमस्यावगते। स च चोद्यमानोपि संनिधेर्न कर्मान्तरमित्युक्तं।। तस्मात् सोमस्या
यं कालविधिः।। फलसंयोगस्त्वचोदिते न स्याद्द्रव्योपपत्तत्वात्। वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जा
ते इति विधायाम्नायते। यस्मिन् जात एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भ
वतीति। तदिदं पूतत्वादिकं रात्रिसत्रप्रतिष्ठावत्फलमिति स्थितं। तत्किं इष्टिकर्तुः फलं पितुरुत पुत्रस्येति वि
चारे। अन्यफलकर्मणि अन्यस्य प्रेरणासंभवात् पितुरेव फलप्राधान्यगता आत्मनेपदादिनि साध्य
कर्मफलानामाधातृगामित्वनियमात् पितुरेव फलानि तदर्थं नैव वाक्यशेषस्य फलमेतत्प्रकल्प्यते १०
विधेः कर्तृसमीहितसाधनत्वावगमात् प्राधान्यवाक्यगतात्मनेपदबलाच्च आत्मा वै पुत्रनामासीति मंत्रवर्णाच्च अस्मिंजात इति पितरमेवोपक्रान्तस्यैवेदं फलमु
च्यते इष्टिकर्तृत्वादित्यर्थः २

© Dharmartha Trust J&K. Digitized by eGangotri

नेनैवपुत्रगामित्वप्रतिपत्तिरपि स्फुटा॥ यस्मिन् जातएतामिष्टिंनिर्वपति सपूतोभवतीतिस्पष्टंपुत्रगामित्वं। पुत्र
फलमपिपितुरभिलषितमेवेतिविधेरात्मनेपदस्य चाविरोधः। एवंवा। उ यमेवं वैश्वानरीयाविंस्यते किंजनना
नंतरमेवकर्त्तव्याउत कृते जातकर्मणीति निमित्तानंतरं नैमित्तिकमुपसंजातं विनाकारणेन नातिक्रमि
तव्यं। अतोनंतरमेवस्यात्॥ सत्यं ईहत्वस्तिकारणं पुत्रफलार्थहीदंकर्मतस्यच कृते जातकर्मणि स्तनप्रा
शनं नपुनः प्राक्। अकृतेहि जातकर्मणि ... ष्टिर्निरूप्यमाणा स्तनप्राशनमुत्कर्षेत्। ततःकुमारविपत्तिप्र
संगात् इष्टिरेवेयमनर्थिकास्यात्। तस्मात्कृते जातकर्मणिकर्त्तव्या। पुनश्चिंसते। किंजातकर्मानंतर
मंतर्द्दशाह एवकर्त्तव्या उताशौचापगमे स्वकाले चागतइति। निमित्तानंतर्यात्प्रयोजनविरोधतः।
नचाशौचतद्भावात्पुनर्नोत्कर्षमर्हति॥ शौचांगेनविनाप्येषाकर्त्तव्यैवनिमित्ततः। अपिवाप्यकर्मशौ ६४
स्यादितिषष्ठेहि वक्ष्यते। उच्यते। निमित्तस्यरसात्प्राप्तिर्यातावत्सानिवारिता। प्रयोजनविरोधेनतस्मा
दंगोपसंग्रहः। निमित्तानंतर्यंतावत्प्रयोजनविरोधादेवबाधितमित्युत्कृष्टेष्टिः। उत्कृष्टाचेदवेगुण्यायशौ
चकालप्रतीक्षयाआशौचापगमेपौर्णमास्यादिकालेकर्त्तव्या॥ प्रधाननाप्यिसं...दंगानांमुख्य योगात्

कृ ४

© Dharmartha Trust J&K. Digitized by eGangotri

कालत्वं ॥ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति वाजपेयांगत्वेन चोद्यमानो बृहस्पतिसवः किं प्रधानकाले शा
रदिते न स हेतुः प्रयोगः कर्त्तव्यः उतातिदेशप्राप्ते स्वकाले वसंत इति संशयः । तत्र सांगस्य हि प्रधा
नस्य विधानं देशकालयोः अंगांतरवदस्यापि तदंगत्वात्सह क्रिया । न हि वाजपेयः शारदिकत्वेन चो
द्यते । किंतु वाजपेयकरणकोपकृत्यार्थो व्यापारः प्रयोगः फलभावनाख्यस्तस्यायं कालविधिः । शारदि
वाजपेयेनेति तृतीयानिर्देशात् । तस्यैव फलसामग्रीत्वेन तस्यैव चिकीर्षितस्य कालापेक्षितत्वात् स च व्या
पारोंगप्रधानव्यासक्त इति तुल्यः प्रधानस्यांगानां च तत्कालयोग इति वाचनिककालविरोधादिति वि
ष्टः कालो बाध्यते । न च यं कालो बृहस्पतिसववर्जितांगेषु कृतार्थ इति नातिदेशो बाधितुमुत्सहते । अति
देशोपि कालातिरिक्तांगेषु कृतार्थ इति न वचनसंकोचायालं । तस्मात्प्रधानकालत्वं । एवं प्राप्ते निधी
यते । स सवं वाचनिकः कालो बाध्यते । नातिदेशिकं । बृहस्पतिसवे त्वेष शारत्कालो न चोद्यते । यस्य का
लविधिस्तस्माद्धि स्वनि सस्मृतः । वाजपेयकरणकोपकृत्यार्थप्रति व्यापारः शारदिविहितः तमे
वेष्टेति समभिव्याहृतत्वात्तावत्प्रतिनिर्दिश्यते ततः पश्चात्तत्काले न बृहस्पतिसवश्चोद्यमानस्त २०

20

© Dharmartha Trust J&K. Digitized by eGangotri

प्रयोगविधिःप्राप्तावान्ननकालोलक्ष्यते। यदिपर्ववाजपेयेपूर्वोक्तेभ्यःसन्नतिक्रमकारणाभावादनंतरमेवक्रियेत। अपि
त्वतिक्रमकारणंकालोपसंहारःपूर्वाचपूर्वकालतायांसमर्प्यते नानेनतर्हितस्मात्स्वकालेप्रयोगः। निर्वृत्तमपिच
वाजपेयाख्यंवृत्तमनेनांगेनबलवत्क्रियते॥ ॥इतिशास्त्रदीपिकायांवाजपेयप्रकरणम्॥ ॥प्रकरण्यात्रसामान्या
योरनानामनंगत्वं॥ अनुमत्यादीनिविदेवनादीनिचयागायागकर्माणिइष्टेत्यस्यूयतेराजसूयेनस्वाराज्य
कामोयजेतेति। तत्रसंशयः किंसर्वत्वेवफलवंतिसमप्रधानानि उतपुरुषार्थानि उतयागाःक्रत्वर्थाइति।
रा६ तत्रसर्वेषांप्रकृतत्वेनफलापेक्षितयातथा। राजसूयपदस्यापिसमानत्वात्फलान्वयः। राजसूयशब्दाभि
प्र१ धेयंयद्यपिप्रसिद्धंतथापितृतीयात[illegible]त्वात्फलसाधनाभिधायित्वेननिर्णीतं। अकृतानांफला
पेक्षिणामविशेषात्सर्वेषांनामेत्यध्यवसीयते। एवंसाधनेऽवगतेस्वाराज्येचफलेभावनामात्रेविधि
युक्ताद्राख्यातात्प्रतिपाद्यमपेक्षितमितितन्मात्रपरमाख्यातंकेवलस्ययत्रयोगासंभवात्तुयत्रक
वनधातोरुपादातव्यौ न्यायेनयागायागसमुदायेयजिरनुवादस्तत्प्रयुज्यते। ततःसर्वेषां
फलान्वयात्प्राधान्यं॥ उच्यते॥ धात्वर्थानांफलैर्योगोननाम्नामितिहिस्थितं यत्किंचयागमेवाहयजे
स्तेनफलान्वयः॥ राजसूयपदंचापियज्ञेष्वेकाधिकरण्यतः यागनामेवतेनाचयागानांस्यात्प्रधा

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰ ए॰ घृतादिलोपेपि प्रधानलोपनिमित्तं कर्मकार्यं सिद्धं तेंगलोपनिमित्तमिति ।

ननाऽन्तरनुष्ठत्वात्संन्निधा [illegible] नाचदंगं भवति । मध्यस्थं यस्यतन्मध्ये ॥ स्थितमपा
गानामंगत्वं । तत्र विदेवनादयो भिषेचनीयाख्यसोमयागविध्यनंतरमाम्नाता स्तद्दी
यमाहेंद्रस्तोत्रकाले ऽपकृष्टाः माहेंद्रस्य स्तोत्रं प्रत्यभिषिच्यत इति । अयं विदेवनादी
नामभिषेकांतानामपकर्ष इति । तद्दमेऽभिषेचनीयांगं न राजसूयांगमिति संन्नाये ऽ
भिषेचनीयप्रकर्षाभावात्संहितप्राकृतांगमध्यपातादेवांतरप्रकरणेनाभिषेचनीयांग
तामात्रं कुमानस्योत्तरं ॥ तत्र प्रयोजनापेक्षाप्रकर्षणां यत्र चोदना । विदेवनादिकानां
तु न मध्ये प्रकृतविधिः । अभिषेचनीयानंतरं विहिताः प्रयोजनापेक्षाः संनिधिप्रा
प्ताभिषेचनीयांगत्वबाधेन प्रकरणाद्राजसूयांगतां नीताः नापकर्षसमये त्वयं प्र

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰ पृ॰ अभिषेचनीयारंभे विदेवनादीन्यविस्मृतसमस्तानुष्ठानसिद्ध्ये परिगणनीयानि कस्यचिदंगस्यांतरायशंकापनु
त्तये कर्मारंभे परिगणनस्यानशास्त्रपरिमाणसादित्वाच्चाचार्यैरुक्तत्वाच्च । सिद्धांते तु सर्वो दोषः सर्वांगत्वादिति २

प्र १ न १

योन्नमापेक्षं येनावांतरप्रकरणविषयतां प्रतिपद्येरन् । तस्माद्राजसूययागांगाः ॥ ॥ प्रक

रणाविभागे च विप्रतिषिद्धं द्व्युभयं ॥ राजसूय एव सोम्यश्चरुरैंद्रबार्हस्पत्यो विहितः । निर्वपति वि

धायश्रूयते । पुरस्तादुपसदां सोम्येन प्रचरंतीति । किमयं चरुरुपसदामंगं जगप्र

योजनसंबंधोयं तत्र यागांतरवत्तूफलार्थः कार्यो यं संयोग इति चिंत्यते ॥ त

त्रप्रकरणापक्षात्सामान्यवचनाद्वयं । ज्योराज्ये विनियुज्यते समाहाद्युपसदंगता ।

नश्च सोम्येनेति सच्च त्वाद्येन तृतीयां तेन षष्ठीनिर्दिष्टोपसदंगत्वेन विनियुज्यमा

नः सोम्यः प्रकरणापेक्षेण सामान्येन राजसूयवाक्येन फलसंबंधं लभते ॥

पुरस्ताद्वद्ध्याग्मागस्य तत्समीपेनुष्ठानादूयथा कथंचिदनुवादः ॥ अत्रापि

ननु षष्ठी दियागलक्षणा अतो नतादर्थ्यं गमयतीत्यत आह पुरस्तादिति । यथाकथंचिच्छब्देन पाक्षिकानुवादत्वास्व

चिना

© Dharmartha Trust J&K. Digitized by eGangotri

धीयतेनेयं षष्ठी नादर्थ्यवाचिनी। द्विग्योगत्तस्य गालेषापुरस्ताद्वद्योगतः। अंगांगि
भावमात्रे हि पुरस्तादित्यनर्थकं। प्रसज्येत परं तस्मात्कालत्वाद्विधीयते। तथा
च सति नांगत्वं विधानुं नूयाकुपाद्विधिः। न ह्यनुसन्निविधयोनेकार्थव्याप्तिसमाः।
तस्मान्न कालार्थपदत्वं योगादित्थं कालार्थः सोम्यः। प्रकवद्धोतेहेतुत्वादितरस्य प्रधानं
स्यात्॥ वैश्वदेवीं सांग्रहणीं निर्वपेद् ग्रामकाम इति। अस्यामनमस्यामनमस्य देवाइ
ति तिस्र आहुतीर्जुहोतीत्यामनहोमाः विहिताः। किं ग्रामकामपदानुषंगेण सांग्रह
णावत् फलार्थाः उत सांग्रहण्यंगमिति संशये सांग्रहण्याः प्रकृतांगनिराकांक्षायाः
पुनरंगापेक्षाभावात् आमनहोमानां च फलपदानुषंगेण प्रयोजनावाप्तेरनपेक्षत्वा
त्संभवति च प्राधान्येंगत्वायोगात् ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ ९२

© Dharmartha Trust J&K. Digitized by eGangotri

तर्हि पाते अग्नेरजाशये सादावपि न स्यादत आह २

अतिशयार्थे प्रकरणादेवागतो वक्तुं मुक्तं आमनेति । यस्य याजानां पुरस्तात्क्रुक्रमाल् बहिरासनः सजाता

फलार्थत्वे साप्तेऽनुषंगे सकृदाम्नातस्य पुनरनुसंधानात्तथात्वसति सकृदाम्नातरूपबाधाल्
अत्यंतागतिकृतया तदाश्रयणादिह चानपेक्षतया सोग्रहः एषाः प्रकरणान्नावेपि संनिधेरेवत
दंगत्वसंभवात् । आमनहोमानां चेशाकृतो गमध्यविहितत्वेन प्रकरणसंस्पर्शस्यापि संभवा
दगतित्वाभावादनुषंगानाश्रयणात्परिधिमंत्रव्यवायेन च तदसंभवात् अंगलमेवन्याय्यं ॥ ॥
दधिग्रहो नैमित्तिकः श्रुतिसंयोगात् ॥ ज्योतिष्टोमे श्रूयते । यां वै कांचिदध्वर्युश्च यजमानश्च दे
वतामंतरितः तस्या आवृश्चते प्राजापत्यं दधिग्रहं गृह्णीयादिति । सोयं दधिग्रहः किं नैमित्तिकः
उत नित्यो नैमित्तिकश्च । अथ नित्य एवेति संशये । देवतांतरयेयागो निमित्तेयं विधीयते । त
स्मान्नैमित्तिकः स सत्यं नित्योपि ज्येष्ठशब्दतः । नैमित्तिक इति सत्यं । नित्योपि स्यात् । कुतः
ज्येष्ठशब्दसंस्तवात् । ज्येष्ठो वा एष ग्रहाणामिति प्रशस्तवचनो ज्येष्ठशब्दो नित्यस्य प्रशस्तो
न तु लः । अथवा प्राथम्यनिमित्तं ज्येष्ठ्यं नित्यस्य च न्ययं पाठक्रमाद्ग्रहांतरेभ्यः प्रथमं ग्र
माणेन भवति ज्येष्ठः । नैमित्तिकस्तूपजाते निमित्ते क्रियमाणो न नियोगतो ज्येष्ठः स्यात् । तस्मादु
भयरूपः स्यात् न त्वेवं नित्य एव सः । ननु नैमित्तिकोयं स्यान्निमित्तस्याश्रुतत्वतः । न ह्यंतरयो
घाविधानेन प्रकरणादेव विकृसामहीष्यंतरस्पर्शः । अनुषंगविषय एवायं न संभवतीत्याह परिधी
ति ३

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰ आद्ये निमित्तत्वस्य लब्धत्वात् ॥ ऐरूपेषा ठक्रम प्राप्त कालोऽपृह लोपि अंतरये पुनर्यो त्येः ॥ सिद्धान्तस्त्वन्तत्वमिति २
कर्तृसमानाधिकरणयच्छब्दसत्त्वेपि विशेषाशं कार्थमधिकरणं ७ पुंगीनः प्रथमं मनस्त्वादिमंत्रसंपादितं गाडुरखा २

निमित्तत्वेन श्रूयते । यदिशब्दाद्यभावात् । यच्छब्दस्य चाकर्तृसमानाधिकरणस्य तत्प्रतिपाद
कत्वाभावात् । अर्थवादमात्रमंतरयणश्रवणमिति नित्यएव स्यात् ॥ ॥ वैश्वानरस्यानित्यः स्या
न्निरपेक्षः समानसंख्यत्वात् ॥ अग्नौ श्रूयते यो वै संवत्सरमुख्यमभृत्वाग्निं चिनुते यथा सा
मिगर्भो विपद्यते तादृगेव तदार्तिमार्छेद्वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेदिति । अत्रा
पि पूर्ववदर्थवादमात्रं संवत्सरानरणमिति नित्यतां मन्यन्ते यच्छब्दस्याकर्तृसमभिव्याहृ
तो निमित्ततां संवत्सरानरणस्य प्रतिपादयतीति नैमित्तिकत्वेवस्थिता । षड्वितिः पूर्ववत्ता 23
स्यात् ॥ योग्निं चित्वान प्रतितिष्ठति पंचपूर्वा श्चितयो भवंत्यथ षष्ठीं चितिं चिनुते प्रतितिष्ठत्या
इति । किमियं षष्ठी चितिर्नित्यानित्या वा नित्यैः षड्वितिकः उत सप्रपंचचितिकरवाइदं तु चयनांतर
मेकचितिकं । अप्रतिष्ठायां निमित्ते विधीयत इति । तत्र । इरणप्रत्ययोनस्मात्त्वमहं रख्या इ
रणादिना । पंचचितिः सहितावेषामित्येतां न केवलां नहि केवलातिः षष्ठीति शक्या वक्तुं । त
स्मान्नित्यैवासौ षड्वितिकः । नैवं । यच्छब्दो ह्यप्रतिष्ठायाः स्पष्टमाह निमित्ततां । अविधा राम २
नक्रियापेक्षेषष्ठीं रख्या इरणं भवेत् । नित्याः पंचचितयः प्रागुक्तिहिताः ततः परमियं नैमित्तिकस्य
वादमात्रं संवत्सरानरणं न तु नित्यं ... ति
नापि त्वन्तेनेरूपपन्ने नैमित्तिकमेव

© Dharmartha Trust J&K. Digitized by eGangotri

न्निधीयते इत्यन्निधानापेक्षं षष्ठीत्वमुपपन्नमितितनयकब्रावगतनिमित्तापन्हवः शक्यः कर्तु
मिति नैमित्तिकी यो ॥ पितृयज्ञः स्वकालत्वादनंगं स्यात् ॥ अमावास्यायामपराह्णे पिंडपितृ
यज्ञेन चरंतीति अनारभ्याधीतः पितृयज्ञः फलार्थत्वात् पुरुषार्थ इति संशये । कर्मवचनेनामावा
स्याशब्देन समभिव्याहारात्तदंगत्वं । यद्यपि कालस्यापि साधारणो यं शब्दस्तथापि फलक
प त्यनापरिहारार्थं कर्मवाचित्वैवांगो क्रियते । तस्मात् फलार्थ एवायमाहिताग्नेः । अनाहिताग्नेरप्यना
हिताग्निनाकार्य इति विहितः तस्य फलत्वाभावाद्भवतु पुरुषार्थः । तथा च भगवता मनुनानदर्शे
पितृयज्ञः ६ न विनाश्राद्धमाहिता (ग्निनाकार्य इति विहित) ग्नेर्द्विजन्मन इति वदता दर्शांगत्वं प्रदर्शितं । अनं
गं हितेन विना क्रियेत । तस्माद्दर्शांगं । नैवं (साधारणत्वेपि सामानाधिकरण्यतः) कालवाचित्वमे
व स्यात् तत्सापेक्षत्वात् कर्मत्ति । यद्यपिताव त्साधारणोमावास्याशब्दः तथाप्यपरान्हसामानाधि
करण्यलिप्सया कालवाचित्वमध्यवसीयते । न चायमतीवसाधारणः कांकेहि निरपेक्षो यं का
लसंबंधापेक्षयातु कर्मणिवर्त्तते । तस्मात् कर्मसमभिव्याहाराभावादनंग । मनुवचनस्य त्वयम
र्थः श्राद्धशब्देन मासिमासि श्राद्धमुच्यते । दर्शशब्देनाप्यमावास्याकालः । तदयमर्थः अमावा
स्य पौर्णमास्यामाधानेऽनंतरामावास्यायां न कार्यं ॥ भावात् कं इष्टयेनामयने च मासं दर्शपूर्णमासाभ्यामिति
दर्शांगत्वादर्शविकृतिषु चकार्यः सिद्धांते तु विपर्यय इति २

© Dharmartha Trust J&K. Digitized by eGangotri

एकादशानीषोमीयकालीनायूपस्यास्तिइयंतुद्वितीयाऽ

स्यायामेवाहिताग्निः श्राद्धं कुर्यान्न तेन विना। सर्वेषांवापरपक्षाहःसु क्रियमाणेपितृन्प्रीणातीति स्मरत्यं तु रव शादन्येष्वप्यहःसु कुर्यादिति। एवं च स्मरत्यंत ऽ मनाहिताग्नि विषयंत्वविष्यति। त त्सिद्धं पितृयज्ञस्यानंगत्वं॥ ॥पश्वंगंरशनास्यात्तदागमे विधानात्॥ आश्विनं ग्रहं गृहीत्वात्रि वृतायूपंपरिवीय आग्नेयंसवनीयंपशुमुपाकरोतीति येयंसवनीयस्यांगभूताद्वितीयारशना सा किं पशुबंधनार्थाऽत यूपसंस्कारार्थेति संशये। यूपार्थासत्यदृष्टार्थादृष्टार्थापशुबंधनी। अनपक्रमणात्तेनपश्वंगं रशना स्यात्। नहि यूपस्य रशना किंचिदृष्टं करोति पशोस्तु न पक्र मणं कुर्वती भवति दृष्टार्था तेन त्रिवृत्वादिपदिका त्रिवृता रशना वाक्ये न पशुयागांगतया विधीयते। त्रिवृद्यूपस्य माग्नेयमुपाकरोतीति। सा च दृष्टेनैव पश्वनपक्रमणेन तदंगतां प्रतिपद्यते। या च त्रि वृच्छब्देन द्वितीयाया च यूपं परिव्ययतीति द्वितीयान्तस्य वैस्पष्टानुवादः। यूपे हि पशुर्बद्धव्य श्चोदकप्रा प्तः। यश्च रशनया यूपे पशुं बध्नाति सोवश्यं युपे रशनां व्यापारयति। यत्र व्यापारयति सशक्य तेतया यूपं परिव्ययतीति वक्तुं। अतोयमनुवाद इति पश्वर्थारशना चोदकप्राप्ता चान्या रशना ता भ्यामुभाभ्यां पशुर्बध्यते। ततः पश्वर्थारशना। तदर्थं च परिव्याणं यूपे तस्याः प्रतिमोचनं। प्रतिमु चोदकाद्रशनास्त्येवेत्यत आह इतीति। अग्नीषोमीयरशनासत्वेपि यूपार्थत्वपक्षे यद्याद्वितीयायाक्यनात्स मुच्चयस्तथापश्वर्थत्वेपि तथीननरुचयमोद्वितीयाजाद्वितीयत्वे एवं च रशनापरिव्याणयूपानांदृष्टार्थतामन तीत्याह तत इति परिव्याणशब्दार्थमाह यूप इति

राम २५

परशनांगाकंस्य यूपपरिव्याणं त्वाप्रसयेनारादुपकारकं पशूपाकरणांगं सत् तद्वारा पश्वर्थं ननु यूपांगमिति पूर्वपक्षि
ते दृष्टार्थत्वेऽस्य स्याच यूपार्थत्वे संभवति न वै नोपाकरणं प्रसारादुपकारकत्वायुक्तेति सिद्धांत माहुः तदूषयति केचि

कात्तिकः संवत् ९२

त्वाहिंसाश्रनपक्रमणाय कल्पते। यूपोपि रस्त्वा एणुस्त्वानीयः तदर्थमेवेति सणिच्यूपेनस्याः ३ र्न
मेवदृष्टार्थं न्नवतीति स्मात्पश्चर्थं त्येवं प्राप्ते ब्रूमः। यद्यदृष्टार्थता यूपे स्यादेवं क्लिष्टकल्पना। यू
पार्थासत्यपि तेषादृष्टार्थादायोजन्मनः। परिव्याणं हि यूपार्थं द्वितीयातोवगम्यते। रशना चपरि
व्याणशेषभूतात्तृतीयया। सर्वं तद्विपरीतं स्यात् पश्वर्था रशना यदि। यूपार्था रशनात समाद्व वेन्न
पशुवंधनी। केचित्तु पूर्वपक्षेपि न पशुवंधनार्थी रशना यूपस्यैव परिव्याणं पशूपाकरणस्या
रादुपकारकमिति पूर्वः पक्षः सिद्धांतस्तु। यूपसंस्कारार्थमित्येवमाहुः। तथा सति अनुष्ठाना
विशेषान्निष्प्रयोजना चिंता स्यात्। पशुगणे त्वेकयूपे सहकृत्तमे वपरिव्याणमगृह्यमाणविशे
षत्वात्तंत्रेण सर्वेषामुपकुर्यादिति प्रति पशु रशनाकार्येति प्रयोजनं न सिध्येदित्याख्यातावत्।
॥ ॥ स्वरुश्चाप्येकदेशत्वात्॥ यूपस्य स्वरूं करोतीति स्वरुणा पशुमनक्तीति किं यूपार्थः स्वरुः तस्य
पश्वंजनं प्रतिपत्तिः उत पश्वर्थः तस्य यूपादुपादानमिति संशये यूपस्येति षष्ठ्यादेवदत्तस्य
गौरितिवत्तादर्थ्यं मन्यते। स्वरुणा पशुमित्येवं शेषशेषिविरुक्तिः। स्वरोः पश्वंजनांगत्वं प
शोश्चापि प्रधानता। यूपस्येत्येवयवव्यतिरेकजनिता षष्ठी न तादर्थ्यं गमयतीति पश्वर्थः स्वरुः।
द्धांते तु यूपपक्षे वेसनुष्ठाना विशेषः प्रयोजनं। भवनमतेत् नयथा पशु म ४ पमात्रवचनान्नश्रयंजनमस्ती
त्यर्थः। ननु सवनीये प्रयोजनाभावो[illegible] दश पशुनियोजनपक्षे प्रतिपशु रशना
कार्यापक्षमलपक्षोऽयूपार्थत्वे यूपे नयादेकैव तिप्रयोजनं भविष्यतीत्याहुआरुः पशुगणे त्विति। आरादुप

© Dharmartha Trust J&K. Digitized by eGangotri

एवाधिकरणेऽप्यपघनेन कल्पैकस्यैव पशोरंजनं सिद्धांते सर्वेषामिति।
एवादिरं वीर्यकामस्येति वत् षष्ठ्या एवार्थत्वेन प्राप्तस्य रूपं बाध्यते एवाऽधिकरणे।

दर्शपूर्णमासयोरिज्या प्राधान्यं विशेषात्॥ दर्शपूर्णमासयोः किं सर्वेषां यागानां प्राधान्यं उताग्नेयादीनामेव काव्ये योगिनामितरेषां तदंगत्वमिति चिंत्यते। य एवं विद्वान् नित्येवं संयुक्तानु वादकोन विधायका वित्यनुवादस्यानु प्रयोजनमाग्नेयादीनामेव प्राधान्यसिद्धिरित्येतावत्स्थितं द्वितीये। अधुनातु तदेव प्रयोजनं सिध्यति नेति चिंत्यते। तत्राख्यातानुसारि लसं ज्ञाया राजसूयवत् तस्या विशेषतो ऽन्ते: सर्वयागप्रधानता। नामधेयं तावदाख्यातानुसारि यत्राख्यातं तत्र वर्तते। ननु यत्र नाम तत्राख्या तं) आख्यातं वा विशेषात्सर्वानेव रूपवतः प्रकृतान्यांनूपादाय फले विनियुंक्ते। अतो नामाव्युत्पन्नं द्विवचनांत प्रतिरूपकं सर्वेत्र वर्तत इति सत्यामप्यनुवादेन समुदायद्वयसिद्धौ सर्वेषां प्राधान्यं॥ ।। उच्य ते॥ यद्दि नामाप्रसिद्धार्थं तदाख्यातवशं न वेत्। इदं पुनः प्रसिद्धार्थमाख्यातस्य विशेषणं। प्राति पदिकं तावत्काव्ये द्वय संयोगादाग्नेयादिषु प्रसिद्धार्थं। द्विवचनमपि य एवं विद्वा नित्येवं संयुक्तानुवादद्वय परिकल्पितसमुदायद्वयाभिप्रायं प्रसिद्धार्थमेवान्य दर्शशब्दस्याप्रसिद्धार्थत्वं। अन्वारंभणीया वाक्यशेषेऽमावास्यापर्यायत्वेन प्रसिद्धत्वात्। तदेवं प्रसिद्धार्थं विशेषवाचि नामधेयं शक्नोत्या ख्यातं सामान्य विशेषवनं स्वविषयेऽस्थापयितुं इति षण्णामेव प्राधान्यमितरेषां तु प्रकरणात्तदंगत्वं॥

दर्शोवा एतयोः पूर्वः पूर्णमास उत्तर इ सुपत्नम्यामावास्या वेसरस्थली सुपर्स हाराद्दर्शोमावास्याशब्दे एकार्थो
© Dharmartha Trust J&K. Digitized by eGangotri
विसर्थः २ राम
प्र॰स॰ प्रयाजादीनामिष्टिविकारेष्वनतिदेशः सिद्धांते त्वतिदेश इति १ २५

ननु प्रकरणात्स्तोमाः सोमयागमात्राङ्गं स्युः। न स्युः सर्वपक्षे तदविशेषादित्याह। सर्वेषामिति ७

कु १

॥ ज्योतिष्टोमे तुल्यान्यविशिष्टं कारणं दीक्षणीयाग्नीषोमीयादीनि हविःपशुयागान्सोमयागं च प्रकृत्य श्रूयते। ज्योतिष्टोमेन स्वर्गकामो यजेतेति। तत्र चिन्त्यते। किं सर्वयागानां फलसंबंधेन प्राधान्यं उत सोमयागस्यैवेतरेषां तदंगत्वमिति। तत्राख्याता विशेषेण सर्वयागप्रधानता। नामधेयं प्रसिद्धार्थमाख्यातं विधिनष्टि हि। ज्योतिराख्या न हि स्तोमाः प्रसिद्धाः कस्यचिद्यजेः। यत्रावयववशो वृत्तिर्नामधेयस्य गम्यते।२। त्रिवृदादिषु तच्छब्दस्य वृत्तिमात्रलयोदितः। ननु स्तोमाभिधेयत्वं ज्योतिःशब्दस्य तावता।३। अस्तु वा त्रिवृदादीनां ज्योतिःशब्दाभिधेयता। तथापि सर्वयागानां तत्संबंधात्प्रधानता।४। स्तोमा हि सर्वयागानामंगं स्फुरविशेषतः। सर्वेषां फलवत्वेन प्रक्रिया न विशिष्यते।५। अतः प्रकरणात्स्तोमाः सर्वयागांगतामियुः। सोमयागेन संयुक्ताः स्तोमवाक्येन चेन्न तत्।६। ग्रहणं स्तोत्रयोर्वाक्ये कालार्थसंगतिर्यतः। द्वयोरपि कृतार्थत्वात्स्तोत्रस्य ग्रहणस्य च।७। स्तोत्राणि तावदाज्यैः स्तुवत इत्यादिवाक्योत्पन्नानि प्रकरणाद्यागांगतां गतानि कृतार्थानि। ग्रहणमप्यैन्द्रवायववादिवाक्यविहितसोमसंस्कारतया कृतार्थमेवातो नेत्रकालार्थ एव संयोगः। ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति। न त्वंगांगित्वावगत्वेनुप्रकरणाविशेषात्सर्वयागान्प्रत्यवगम्य

© Dharmartha Trust J&K. Digitized by eGangotri

नेदमंगताबोधकमिति परिहरति ५

ते। स्तोत्रीयासंख्या च स्तोमशब्देनोच्यत इति तत्संबंधः सर्वेषामविशिष्टः। तेनाख्यातविशेषेण
नाम्नश्चाप्यविशिष्टं प्राधान्यं सर्वयागानामिति प्राप्ते निधीयते।।ज्योतिष्टोमाभिधानस्य यागस्या
त्रफलं स्कृतं। ज्योतिष्टोमपदं वेदवाक्यशेषे निरूप्यते। ज्योतिष्टोमं विवेचनार्थं हेतद् वचनं त्रिवृ
त्पंचदशः सप्तदशः एकविंशः एतानि वा व तानि ज्योतींषि य एतस्य स्तोमा इति। तदिदं त्रिवृदा
दिकस्य स्तोत्रीयासंख्याचतुष्टयस्य ज्योतिःशब्दो वाचकः। अथापि न वाचकः स वै यथा तावत्तत्संब अपितुस्तोत्र कः५
धिनि यागे ज्योतिष्टोमपदं नामतया वर्त्तत इत्येतावद्धि स्पष्टमवगतं। अतस्तत्संबंधिन एव याग
स्य फलमिदं नान्यस्य। न च दीक्षणीयादीनां फलवाक्यप्रवृत्तिवेलायां सोमसंबंधः प्रसिद्धः। या
गानां स्तोत्राणां च निष्फलत्वात् विशेषेणांगांगित्वावानिष्पत्तेः फलसंबंधोत्तरकालं भावि प्राकर 26
णिकस्तोमसंबंधान्निपायं छेदनादिविधा विवयूपपदं ज्योतिष्टोमपदेद्रत्याश्रयणीयं स्यात्।
तत्र प्रसिद्धनिर्देशसरूपः शब्दो बाध्येत। सोमयागस्यापि यद्यप्यनेनैव न्यायेनांगांगिभाव
संबंधः स्तोत्रैरसिद्ध एव। तथापि सोमग्रहणस्य स्तोत्रोपाकरणस्य च कालार्थोपितावत्सं
योगः प्रसिद्धः ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति। तावता च सोमयागस्य स्तो राम
मानां च संबंधमात्रं सिद्धं। तन्मात्रनिमित्त [illegible] बहुव्रीहिरिति शक्यते ज्योतिष्टोमपदेन २८
यः स्वर्गार्थे यागः क्रियते स स्तोमसंबंधसात् ज्योतिष्टोम इति याऽच्छिद्यते स स्वरूप इति वक्ष्यत्यर्थः ५ ७९

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰घ॰दी क्षणी यादीनां सोमयागविकृतित्व नातिदेशः सिद्धांतेत्वतिदेशाद्दति १

सोमयागोत्रिधानुमितितद्विशिष्टोयज्ञिस्तस्यैव फलसंबंधं करोति॥ ॥प्रसिद्धरूपे सति सोमया
गेन दीक्षणीयादिष्ववर्त्तते तत्॥ ततः स एवेह फलान्वयेन प्रधानमन्ये तु तदंगभूताः॥ ॥इ
ति श्री महामहोपाध्याय श्री पार्थसारथिमिश्रकृतो शास्त्रदीपिकायां चतुर्थस्याध्यायस्य च
तुर्थ पादः॥ ॥चतुर्थोध्यायः समाप्तः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

अध्व॰ प्रतिप्र॰ नेष्टा॰ उन्ने॰ ४
ब्रह्म॰ ब्राह्मणा॰ आग्नी॰ पोता
होता॰ मैत्रा॰ अच्छावा॰ ग्राव॰
उद्गाता॰ प्रस्तोता॰ प्रतिह॰ सुब्र

शा॰दी॰ ४ २३

राम २५

© Dharmartha Trust J&K. Digitized by eGangotri

पत्रे ३१

© Dharmartha Trust J&K. Digitized by eGangotri